# shrI subrahmaNyabhuja NgaprayAtastotraM 2

# श्रीसुब्रह्मण्यभुजङ्गप्रयातस्तोत्रम् २

## Document Information

Text title : shrii subrahmaNyabhujaNgaprayaatastotraM 2

File name : subrabhujanga2.itx

Category : subrahmanya, bhujanga

Location : doc_subrahmanya

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran, Sreenivasa Rao Bhagavatula

Description-comments : From stotrArNavaH 07-04

Latest update : March 15, 2006, December 31, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# श्रीसुब्रह्मण्यभुजङ्गप्रयातस्तोत्रम् २

भजेऽहं कुमारं भवानी कुमारं
गलोल्लासिहारं नमस्कृद्विहारम् ।
रिपुस्तोमसारं नृसिंहावतारं
सदानिर्विकारं गुहं निर्विचारम् ॥ १॥

नमामीशपुत्रं जपाशोण गात्रं
सुरारातिशत्रुं रवीन्द्वग्निनेत्रम् ।
महाबर्हिपत्रं शिवास्याब्जमित्रं
प्रभासत्कळत्रं पुराणं पवित्रम् ॥ २॥

अनेकार्ककोटि प्रभावज्वलन्तं
मनोहारि माणिक्य भूषोज्वलन्तम् ।
श्रितानामभीष्टं सुशान्तं नितान्तं
भजे षण्मुखंतं शरच्चन्द्रकान्तम् ॥ ३॥

कृपावारि कल्लोलभास्वत्कटाक्षं
विराजन् मनोहारि शोणांबुजाक्षम् ।
प्रयोगप्रदानप्रवाहैकदक्षं
भजे कान्तिकान्ताम्बरस्तोमरक्षम् ॥ ४॥

सुकस्तूरिकाबिन्दुभास्वल्ललाटं
दयापूर्णचित्तं महादेवपुत्रम् ।
रवीन्दूल्लसद्रत्नराजत्किरीटं
भजे क्रीडिताकाश गङ्गासुकूटम् ॥ ५॥

सुकुन्दप्रसूनावलीशोभितान्तं
शरत्पूर्णचन्द्रस्य षड्कान्तिकान्तम् ।
शिरीषप्रसूनाभिरामं भवन्तं
भजे देवसेनापतिं वल्लभं तम् ॥ ६॥

सुलावण्यसत्सूर्यकोटिप्रकाशं
प्रभुं तारकारिं द्विषड्बाहुमीशम् ।
निजार्कप्रभादीप्यमानाखिलाशं
भजे पार्वतीप्राणपुत्रं सुकेशम् ॥ ७॥

अजं सर्वलोकप्रियं लोकनाथं
गुहं शूरपत्मादिदंभोलिधारम् ।
सुबाहुं सुनासापुटं सच्चरित्रं
भजे कार्तिकेयं सदा बाहुलेयम् ॥ ८॥

शरारण्यसंभूतमिन्द्रादिवन्द्यं
द्विषड्बाहुसंख्यायुधश्रेणिरम्यम् ।
मरुत्सारथिं कुक्कुटेशं सुकेतुं
भजे योगिहृत्पद्ममध्याधिवासम् ॥ ९॥

विरिञ्चीन्द्रवल्लीशदेवेशमुख्यं
प्रशस्तामरस्तोमसंस्तूयमानम् ।
दिश त्वं दयालो श्रियं निश्चलां मे
विना त्वां गतिः का प्रभो मे प्रसीद ॥ १०॥

पदांभोजसेवा समायातवृन्दा
रकश्रेणिकोटीरभास्वल्ललाटम् ।
कलत्रोल्लसत्पार्श्वयुग्मं वरेण्यं
भजे देवमाद्यं त्वहीनप्रभावम् ॥ ११॥

भवांभोधिमध्ये तरङ्गे पतन्तं
प्रभो मां सदा पूर्णदृष्ट्या समीक्ष्य ।
भवत्भक्तिनावोद्धर त्वं दयालो
सुगत्यन्तरं नास्ति देव प्रसीद ॥ १२॥

गले रत्नभूषं तनौ मञ्जुवेषं
करे ज्ञानशक्तिं दरस्मेरमास्ये ।
कटिन्यस्तपाणिं शिकिस्थं कुमारं
भजेऽहं गुहादन्यदेवं न मन्ये ॥ १३॥

दयाहीनचित्तं परद्रोहपात्रं

सदा पापशीलं गुरोर्भक्तिहीनम् ।
अनन्यावलम्बं भवन्नेत्रपात्रं
कृपाशील मां भो पवित्रं कुरु त्वम् ॥ १४॥

महासेन गाङ्गेय वल्लीसहाय
प्रभो तारकारे षडास्यामरेश ।
सदा पायसान्नप्रदातर्गुहेति
स्मरिष्यामि भक्त्या सदाहं विभो त्वाम् ॥ १५॥

प्रतापस्य बाहो नमद्वीरबाहो
प्रभो कार्तिकेयेष्टकामप्रदेति ।
यदा ये पठन्ते भवन्तं तदैव
प्रसन्नस्तु तेषां बहुश्रीं ददासि ॥ १६॥

अपारेऽतिदारिद्र्यपाथोधिमध्ये
भ्रमन्तं जनिग्राहपूर्णे नितान्तम् ।
महासेन मामुद्धर त्वं कटाक्षा-
वलोकेन किञ्चित्प्रसीद प्रसीद ॥ १७॥

स्थिरां देहि भक्तिं भवत्पादपद्मे
श्रियं निश्चलां देहि मह्यं कुमार ।
गुहं चन्द्रतारं स्ववंशाभिवृद्धिं
कुरु त्वं प्रभो मे मनः कल्पसाल ॥ १८॥

नमस्ते नमस्ते महाशक्तिपाणे
नम्स्ते नमस्ते लसद्वज्रपाणे ।
नमस्ते नमस्ते कटिन्यस्तपाणे
नमस्ते नमस्ते सदाभीष्टपाणे ॥ १९॥

नमस्ते नमस्ते महाशक्तिधारिन्
नमस्ते सुराणां महासौख्यदायिन् ।
नमस्ते सदा कुक्कुटेशाख्यक त्वं
समस्तापराधं विभो मे क्षमस्व ॥ २०॥

य एको मुनीनां हृदब्जाधिवासः
शिवाङ्कं समारुह्य सत्पीठकल्पम् ।
विरिञ्चाय मन्त्रोपदेशं चकार

प्रमोदेन सोऽयं तनोतु श्रियं मे ॥ २१॥

यमाहुः परं वेद शूरेषु मुख्यं
सदा यस्य शक्त्या जगत्भीतभीतम् ।
यमालोक्य देवाः स्थिरं स्वर्गपालाः
सदोङ्काररूपं चिदानन्दमीडे ॥ २२॥

गुहस्तोत्रमेतत् कृतान्तारिसूनोः
भुजङ्गप्रयातेन पद्येन कान्तम् ।
जना ये पठन्ते सदा ते महान्तो
मनोवाञ्छितान् सर्वकामान् लभन्ते ॥ २३॥

॥ इति श्रीसुब्रह्मण्यभुजङ्गप्रयातस्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by antaratma at Safe-mail.net
Proofread by antaratma, PSA Easwaran, Sreenivasa Rao Bhagavatula

*shrI subrahmaNyabhuja NgaprayAtastotraM 2*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*